गमनं प्रजातिः पौत्रोत्पत्तिः” भा० । ४पुत्रादिहेतौ शत० ब्रा०७।२।१।४६। ५प्रांशुन्टपपुत्रभेदे पु० मार्क०पु०११८अ० ६प्रकृतियुक्ते न्टपे पु० । [यके यजु० १९।४८।

**प्रजादा** स्त्री प्रजां तद्धेतुगर्भं ददाति सेवनात् दा--क । गर्भधात्रीवृक्षे राजनि० ।

**प्रजादान** न० ६त० । १प्रजाया दाने २आदाने च । प्रजातः जन्मतः दानं शुद्धिरस्य । ३रजते न० शब्दच० ।

**प्रजानाथ** पु० ६त०। लोकनाथे न्टपे प्रजापालादयोऽप्यत्र ।

**प्रजाप** पु० प्रजां पाति पा--क। न्टपे हेमच० ।

**प्रजापति** पु० ६त०। १चतुर्मुखे ब्रह्मणि अमरः । २दक्षादौ ३न्टपे च मेदि० । ४जामातरि ५सूर्ये ६वह्नौ ७त्वष्टरि हेमच०। प्रजापतयश्च बहुविधाः यथोक्तम् “आत्मार्थे चासृजत् पुत्रान् लोककर्तॄन् पितामहः । विश्वे प्रजानां पतयो येभ्यो लोका विनिःसृताः । विश्वेशं प्रथमं नाम महातपसमात्मजम् । सर्वमन्त्रमयं पुण्यं नाम्ना धर्मं स सृष्टवान् । दक्षं मरीचिमत्रिञ्च पुलस्त्यं पुलहं क्रतुम् । वशिष्ठं गौतमञ्चैव भृगुमङ्गिरसं मनुम् । अथर्वभूता इत्येते ख्याताश्चैव महर्षयः । त्रयोदश सुता येषां वंशास्तु संप्रतिष्ठिताः” हरिवं० २०४अ० “ससर्ज सृष्टिं तद्रूपं स्रष्टुमिच्छन् प्रजापतीन् । मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम् । वशिष्ठञ्च महातेजाः सोऽसृजत् सप्त मानसान् । सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः” हरिवं० १अ० । एकविंशतिः प्रजापतयो यथा “ब्रह्मा स्थाणुर्मनुर्दक्षो भृगुर्धर्मस्तथा यमः । मरीचिरङ्गिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः । वशिष्ठः परमेष्ठी च विवस्वान् सोम एव च । कर्दमश्चापि यः प्रोक्तः क्रोधोऽर्वाक् क्रीत एव च । एकविंशतिरुत्पन्ना ते प्रजापतयः स्मृताः” महाभारते मोक्षधर्मः । अन्येऽपि प्रजापतयः पुराणादौ प्रसिद्धा यथा “शंयुः प्रजापतिः” स्मृतिः । ८विष्णौ पु० “पद्मनाभः प्रजापतिः” विष्णुस० । ९यज्ञे निघण्टुः । १०स्वनामख्याते कीटभेदे ।

**प्रजापतिहृदय** न० सामभेदे “प्रजापतेर्हृदयं गायति” शत०ब्रा० ९।१।२।४० “प्रजासु च प्रजापतौ च गायति प्रजापतेर्हृदयमिति किञ्चित् साम तदप्यत्र गायेत् । प्रजापतेर्हृदयं गायत्रादि सामवत् कस्यांचिदृचि न गीयते अपि तु केवलं प्रजाशब्दे प्रजापतिशब्दे च गीयते” भा० ।

**प्रजावत्** पुंस्त्री० प्रजाऽस्त्यस्य मतुप् मस्य वः । १सन्तानयुक्ते स्त्रियां ङीप् । ङीबन्तः । २भ्रातृजायायाम् स्त्री अमरः ।

**प्रजासनि** त्रि० प्रजां सनोति ददाति सन--इन् । सन्तानदा-

**प्रजाहित** त्रि० प्रजायै हितम् । सन्तानजनयोर्हितकारके जले न० शब्दमाला ।

**प्रजिन** पु० प्र+ज्या-बा० नक् सम्प्र० । वायौ शब्दमा०।

**प्रजेश** पु० ६त० । न्टपे प्रजेश्वरादयोऽप्यत्र त्रिका०।

**प्रज्ञ** त्रि० प्रजानाति प्र+ज्ञा कर्त्तरि क । १प्रज्ञायुते प्रज्ञ एव प्रज्ञादि० स्वार्थे अण् । प्राज्ञ तत्रार्थे त्रि० भावे अङ् । २बुद्धौ स्त्री । प्रज्ञा अस्त्यस्य प्रज्ञा० ण । प्राज्ञ प्रज्ञायुते त्रि० ।

**प्रज्ञप्ति** स्त्री प्र+ज्ञपि--भावे क्तिन् । १बुद्धौ हेमच० “ऋतम्भरा तत्र प्रज्ञा” पात०सू० “तस्य सप्तधा प्रान्तभूमिः प्रज्ञा” पात०सू०। २सङ्केते ३देवीभेदे च त्रिका०।

**प्रज्ञाकाय** पु० प्रज्ञा काय इव यस्य । मञ्जुघोषे त्रिका०।

**प्रज्ञाचक्षुस्** पु० प्रज्ञैव चक्षुरिवास्य । धृतराष्ट्रे शब्दर०।

**प्रज्ञादि** पु० स्वार्थेऽण्प्रत्ययनिमित्ते १शब्दगणे स च गणः “प्रज्ञ वणिज उशिज् उष्णिज् प्रत्यक्ष विद्वस् विदन् षोडन् विद्या मनस् (श्रोत्र शरीरे) (जुह्वत् कृष्णमृगे) चिकीर्षत् चोर शत्रु योध चक्षुस् वसु एनस् मरुत् क्रुञ्च सत्वत् दशार्ह वयस् व्याकृत असुर रक्षस् पिशाच अशनि कर्षापण देवता बन्धु ।। अस्त्यर्थे णप्रत्ययनिमित्ते २शब्दगणे च । स च गणः प्रज्ञा श्रद्धा (अर्चा वृत्तिः) (वृत्तेश्च वार्त्ता)” वार्त्ति० ।

**प्रज्ञान** न० प्र+ज्ञा—भावे ल्युट् । १बुद्धौ । करणे ल्युट् । २चिह्ने अमरः । प्रज्ञानमस्त्यस्य अच् । ३पण्डिते त्रिकाण्डकोषः ।

**प्रज्ञाल** त्रि० प्रज्ञाऽस्त्यस्य सिध्मा० लच् । बुद्धियुते त्रि०।

**प्रज्ञिन्** त्रि०प्रज्ञाऽस्त्यस्य इनि । पण्डिते त्रिकाण्डको०पक्षे मतुप् मस्य वः । प्रज्ञावत् तत्रार्थे उभयतः स्त्रियां ङीप् ।

**प्रज्ञिल** त्रि० प्रज्ञा+अस्त्यर्थे पिच्छा० इल । बुद्धियुते

**प्रज्ञु** त्रि० प्रगते विरले जानुनी यस्य जानुनोर्ज्ञुः । विरलजानुके जने अमरः ।

**प्रडीन** न०प्र+डी--क्त । खगगतिभेदे खगगतिशब्दे दृश्यम् ।

**प्रण** त्रि० पुराभवः प्र+“नश्च पुराणात् प्रात्” ५।४।२० वार्त्ति० न । पुराणे प्राचीने चकारात् पक्षे त्न प्रत्न+ख प्रीण तत्रार्थे त्रि० ।

**प्रणक्ष** पु०प्रकृष्टः नक्षः पूर्वपदात् णत्वम् । नखाग्रे “आप्रणखात् सर्व एव सुवर्णः” छान्दो०। [२विनययुते च ।